# अखिलभारतीयशास्त्रोत्सवः

## जनिकर्तुः प्रकृतिः (वाक्यार्थसभा)

केन्द्रीयसंस्कृतविश्वविद्यालयेन हरिद्वारस्थपतञ्जलिविश्वविश्वविद्यालये समायोजितस्य द्विषष्टितम-अखिलभारतीयशास्त्रीयप्रतियोगिताकार्यक्रमस्य शुभारम्भः (१८/०३/२०२५) दीपप्रज्वलनपुरस्सरं समभूत्। शास्त्रोत्सवनाम्ना आचर्यमाणे अस्मिन् कार्यक्रमे सर्वादौ वाक्यार्थसभा समायोजिता।



**जनिकर्तुः प्रकृतिः** इति विषयम् अवलम्ब्य आदौ विद्वद्भिः वाक्यार्थः कृतः। कुलपतीनां वरखेडीवर्याणां भव्योपस्थितौ आयोजितायाः वाक्यार्थसभायाः आध्यक्ष्यम् आचार्यदेवदत्तपाटीलवर्यैः निरूढम्। आचार्य-ब्रजभूषणओझावर्यः (पदशास्त्रमाश्रित्य) आचार्यज्ञानेन्द्रसापकोटावर्यः (प्रमाणशास्त्र-माश्रित्य) आचार्यतुलसीकुमारजोशीवर्यः (वाक्यशास्त्रमाश्रित्य) आचार्यकुप्पाबिल्वेश-शर्मवर्यश्च (अद्वैतवेदान्तशास्त्रमाश्रित्य) क्रमशः वाक्यार्थमकुर्वन्।

शृङ्गात् शरः जायते, मृदः घटः जायते, पुत्रात् प्रमोदः जायते इत्यादीनि उदाहरणानि यथेष्टम् उपस्थापयन्तः विदुषां मोदाय वाक्यार्थोपस्थापकाः प्रायतन्त। जयतीर्थमुनिमतमाश्रित्य 'ब्रह्मणः प्रजाः प्रजायन्ते' इत्युदाहरणमवलम्ब्य च सर्वशास्त्रसमन्वयदृष्ट्या वाक्यार्थः वरखेडीवर्यैः सर्वान्ते विहितः। प्राचीनमीमांसकानां मतमाश्रित्य अध्यक्षैः देवदत्तपाटीलवर्यैः वाक्यर्थसभायां पूर्णाहुतिः समर्पिता।

**वाक्यार्थात् उत्कर्षः जायते** इति अभिनवम् उदाहरणम्। उत्कर्षे वाक्यार्थः सहकारिकारणमस्ति। किञ्च उत्कर्षः भारतीयज्ञानपरम्परायाः उपजायते। तदर्थं वाक्यार्थः अपरिहार्यः। वाक्यार्थस्य विषयोऽपि (जनिकर्तुः प्रकृतिः) विशिष्टः एव आसीत् इति पिण्डितोऽर्थः।







## शास्त्रैषणा महीयसी (उद्घाटनसमारोहः)

शास्त्रोत्सवस्य (द्विषष्टितम्याः शास्त्रीयप्रतियोगितायाः) औपचारिकोद्घाटनकार्यक्रमे त्रयः कुलपतयः विशेषरूपेण उपस्थिताः आसन्। उद्घाटनसत्रस्य अध्यक्षः केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिः आचार्यश्रीनिवासवरखेडीवर्यः अवदत् यत् अयोध्या मथुरा माया... इत्याद्याः सप्त पुर्यः स्मर्यन्ते पूज्यन्ते च। सप्तसु मायापुरी (हरिद्वारम्) अन्यतमा। आधुनिके युगे हरिद्वाराभिधाने अस्मिन् स्थाने मयोपमाभ्यां  योगायुर्वेदयोः आचार्याभ्यां योगायुर्वेदयोः संवर्धनं विधीयते इति दर्शं दर्शं विश्वस्य सर्वेऽपि सन्तुष्टाः सन्ति। अधुना हरिद्वारं सारस्वतकार्यस्यापि अभिप्रेरणास्थानम्। अतः अत्र शास्त्रोत्सवः सर्वेषाम् इष्टाय कल्पत एवेति।



अद्यत्वे मया लोपद्वयं विद्याकेन्द्रेषु सर्वत्र विलोक्यते। एषः लोपः अस्माभिः यत्नेन यथाशीघ्रं च दूरीकर्तव्य एव। जिज्ञासायाः लोपः तपसः लोपः इति लोपद्वयं विद्यामार्गे सदैव (यूनां युवतीनां च) बाधकमेव। विना जिज्ञासां तपः विना (परिश्रमेण) किं वा साधयितुं शक्नोति छात्रः? अतः लोपस्य दूरीकरणं विधेयम् एवेति।




विशिष्टातिथिषु अन्यतमः महर्षि-पाणिनिवैदिकविश्वविद्यालयस्य कुलपतिः आचार्यविजयकुमारः सि. जी. वर्यः अभाषत। दशकद्वयात् प्राक् केवलं संस्कृताध्ययनकेन्द्रेषु विभागेषु सम्बद्धप्रकोष्ठेषु च भारतीयज्ञानपरम्परायाः विषये चर्चा भवति स्म। अधुना स्वर्णयुगे देशस्य कोणे कोणे सर्वेषु स्थानेषु केन्द्रेषु च भारतीयज्ञानपरम्परायाः निनादः श्रूयते। अतः अस्मिन् युगे वर्तमानाः वयमेव धन्याः इति।

जयपराजययोः चिन्तां त्यक्त्वा स्पर्धासु भागं गृह्णन्तु इति सङ्गीत-नाटक-अकादमी इत्यस्य अध्यक्षा डा.सन्ध्या पुरेछा-महोदया अवदत्। प्रज्ञानमेव (Wisdom) अस्माकं लक्ष्यं स्यात् इत्यपि। तदग्रे अखिलभारतीयशिक्षासमितेः अध्यक्षः प्रो. एन्. पी. सिंहवर्यः अवदत् यत् पाश्चात्यदार्शनिकः विलियम जेम्स डुरांटवर्योऽपि सकलभाषाणां जननी संस्कृतभाषा अस्ति इति कथयति। अस्माभिः यदि भारतीयज्ञानपरम्परायाः मूलतत्त्वानि ज्ञातव्यानि तर्हि संस्कृतवाङ्मयस्य अध्ययनं सर्वेणापि भारतीयेन करणीयम् एव। कृत्रिमबुद्धेः सदुपयोगाय स्पष्टप्रतिपत्तये ( coding and decoding) चापि संस्कृतभाषा अनिवार्या अस्ति इति।



तदग्रे पतञ्जलिविश्वविद्यालयस्य कुलपतिः आचार्यः बालकृष्णवर्यः अवदत् यत् यदि भारते शास्त्रं न स्यात् संस्कृतिरपि न स्यात् तर्हि आचार्य-बालकृष्णवर्योऽपि न जायते स्म न वा पतञ्जलिपीठम्। सर्वशक्तिमत् शास्त्रम्। केन्द्रीय-संस्कृतविश्वविद्यालयेन योगपीठे शास्त्रोत्सवः आयोज्यते इति ममापि हर्षस्य विषयः वर्तते इति।




स्वामिनारायणगुरुकुलपक्षतः स्वर्णशलाकाः यथापूर्वं समर्पिताः। स्वर्णशलाकायाः प्रायोजक-स्थानीयमिदं गुरुकुलम् आबहोः कालात् कार्यरतं वर्तते।

स्वागतवचनानि कार्यक्रमसंयोजकेन प्रो. मधुकेश्वरभट्टवर्येण वितीर्णानि। सञ्चालनं धन्यवाद-समर्पणं च डा.पवनव्यासवर्येण सुष्ठु सम्पादितम्। द्विसहस्राधिकाः गुरुकुलच्छात्राः विश्वविद्यालयस्य छात्राः स्पर्धालवः च उद्घाटनावसरे साक्षिणः अभवन्।



शास्त्रोत्सवसारसङ्ग्रहः -

**आचार्यः गणेशतिम्मण्णपण्डितः**

स्पर्धासंयोजकः

**श्री श्रीशसमीरः के. एस्**

**श्री निखिलः**

